# अक्षराणि।

संस्कृतभाषालेखनार्थं देवनागरीलिपिः उपयुज्यते। लिपिः वर्णादीनां बोधकं चिह्नम्। सर्वेषाम् अक्षराणां समूहः अक्षरमाला इति उच्यते। अक्षराणि स्वराः व्यञ्जनानि च इति द्विधा विभक्तानि। स्वराक्षराणाम् उच्चारणसमये अन्येषां वर्णानां साहाय्यं नापेक्षितम्। "स्वयं राजन्ते इति स्वराः।"लृ–कारस्य प्रयोगः अत्यन्तविरलः। अन्तिमौ अं ,अः इति वर्णौ अनुस्वारविसर्गौ स्तः। एतयोः उच्चारणं स्वराक्षराणाम् अनन्तरमेव भवति। स्वराक्षराणि भाषाशास्त्रे 'अच्' शब्देन व्यवह्रियन्ते। अनुस्वारविसर्गयोः तु अचि व्यञ्जनेषु च अन्तर्भावः।

स्वराः उच्चारणसमयदैर्घ्याधारेण ह्रस्वः , दीर्घः , प्लुत इति त्रिधा विभक्ताः। एकमात्रः स्वरः ह्रस्वः , द्विमात्रः दीर्घः , त्रिमात्रः प्लुतः च भवति। दूरस्थितस्य पुरुषस्य आह्वानाय प्लुत उपयुज्यते।

उदा – आगच्छ कृष्ण ३(त्रिमात्रः) अत्र गौः चरति। भो बाल ३(त्रिमात्रः) : आगच्छन्तु। व्यञ्जनान्तशब्दानां संबोधने तु शब्दस्य टेः प्लुतः कल्पनीयः (पदान्तव्यञ्जनात् पूर्वः स्वरः) यथा–राजे ३(त्रिमात्रः) ष्।

व्यञ्जनवर्णाः सर्वे स्वराक्षरस्य साहाय्येनैव उच्चार्यन्ते। अक्षरमालायां स्वरस्य साहाय्येनैव व्यञ्जनानि प्रदर्शितानि।

उच्चारणस्थानम् अनुसृत्य व्यञ्जनानि –

१. कवर्गः २. चवर्गः

३. टवर्गः ४. तवर्गः

५. पवर्गः ६. अन्तस्थाः (मध्यमाः)

७. ऊष्माणः चेति विभक्तानि।

शुद्धव्यञ्जनानां लेखने अधः '्'(क्) इति चिह्नमपि योजनीयम्। व्यञ्जनेन सह प्रयोगार्थम् 'अ' इति अक्षरं विहाय अन्येषां स्वराणां कृते अपि भिन्नभिन्नानि चिह्नानि कल्पितानि।

आ ा इ ि ई ी उ ु ऊ ू ,

ऋ ृ ॠ ऌ ए े ऐ ै ,

ओ ो औ ौ अं ं अः ः ।

उदा–

क् + अ – क क् + आ – आ

क् + इ – कि क् + ऊ – कु

क् + ऊ – कू क् + ऋ – कृ

क् + – क् + लृ – क्लृ

क् + ए – के,　　　　　क् + ऐ – कै

क् + ओ – को,　　　　　क् + औ – कौ

क् + अं – कं,　　　　　क् + अः – कः

**संयुक्ताक्षरम्**

एकाधिकानां व्यञ्जनानां मिलितं रूपं संयुक्ताक्षरं भवति।

उदा – क् + व – क्व

व् + य – व्य

क् + य – क्य

'कात्स्न्र्यम्' इत्यत्र पञ्चव्यञ्जनानां संयोगः अपि भवति ।

केषांचन संयुक्ताक्षराणां लेखने भिन्ना रीतिः अस्ति ।

उदा – क् + ष् + अ – क्ष

ज् + ञ् +अ – ज्ञ

त् + र् + अ – त्र

संयुक्ताक्षरस्य लेखने व्यञ्जनानां यथातथमेलनम् अपि कुत्रचित् भवेत्।

उदा – कुक्कुरः , तत्त्वम् ।

अः – एषः विसर्गः भवति। उच्चारणे तु व्यञ्जनभावम् आश्रयते (ह्)

संसर्गः तु स्वरेण सह वर्तते ।

अं – एषः अनुस्वारः भवति। उच्चारणे तु व्यञ्जनभावम् आश्रयते(म्)

संसर्गः तु स्वरेण सह वर्तते।

**आभ्यन्तरप्रयत्नः बाह्यप्रयत्नः च ।**

वर्णोच्चारणप्रयत्नः द्विधा विभक्तः ।

**आभ्यन्तरप्रयत्नः।**

काकलकाद् आरभ्य ओष्टपर्यन्तो भागः आभ्यन्तरः। तत्र भवः यत्नः आभ्यन्तरः।

तद्बहिर्भूतः यत्नः बाह्यः। आभ्यन्तरयत्नः पञ्चधा भवति। स्पृष्टः , ईषत्स्पृष्टः, ईषद्विवृतः,विवृतः, संवृतः चेति तकारात् प्रभृति मकारपर्यन्तानां व्यञ्जनानां स्पृष्टः प्रयत्नः। मध्यमानां (य र ल व ) ईषत्स्पृष्टः प्रयत्नः। उष्मणां (श–ष–स–हानां)ईषद् विवृतः प्रयत्नः। स्वराणां विवृतः प्रयत्नः। ह्रस्वः अकारः प्रयोगे संवृतः। प्रक्रियायां विवृतः। आभ्यन्तरयत्नः सवर्णसंज्ञानिर्णये सहायकः। स्थानप्रयत्नसाम्ये वर्णाः सवर्णाः भवन्ति।

**बाह्यप्रयत्नः।**

नाभिदेशात् उद्भितस्य प्राणवायोः मुखप्रवेशात् पूर्वं यः वर्णोच्चारणयत्नः भवति सः बाह्यः। बाह्यप्रयत्नः एकादशविधः

विवार–संवार–श्वास–नाद–घोष–अघोष–अल्पप्राण–महाप्राणा–उदात्त–अनुदात्त–स्वरितश्चेति। उदात्तः, अनुदात्तः, स्वरितः एते स्वराणाम् एव। अन्ये षट् वर्गद्वयेन विभक्ताः।

१. विवारः नादः घोषः

२. संवारः श्वासः अघोषः

हश् प्रथमविभागे अन्तर्भवन्ति। खर् द्वितीयविभागे अन्तर्भवति(वर्गप्रथमद्वितीयाः शषसश्च खराः)

अल्पप्राणः – वर्गाणां प्रथम तृतीय पञ्चमाः यरलवश्च अल्पप्राणाः।

महाप्राणः – वर्गाणां द्वितीयचतुर्थौ शषसहश्च महाप्राणाः।

बाह्यप्रयत्नाः आदेशानाम् आन्तरतम्यपरिक्षायाम् उपकुर्वन्ति।

उदा – "उदस्थांस्तम्भोः पूर्वस्य" इति सूत्रेण उदः परयोः स्था स्तंभु इत्यनयोः आदेः सकारस्य पूर्वसवर्णः(दकारस्य सवर्णः आदेशः) उद् + स् + थानं अत्र सकारस्य पूर्वसवर्णः पूर्वःदकारः, तस्य सवर्णाः पञ् (तथदधानाम्) अत्र सकारस्य स्थाने भवन् पूर्वसवर्णः महाप्राणः विवारश्वासघोषयुक्तस्था भवेत्। तादृशः पूर्वसवर्णः थकारः उद् + थ् – थानम्। एवम् अन्यत्रापि।

| वर्णानाम् उच्चारणस्थानानि। | स्वराः | उच्चरिताः वर्णाः | अवर्गीयव्यञ्जनानि | | स्थानजन्यवर्णस्य नाम |
|---|---|---|---|---|---|
| | | | अन्तस्थाः | ऊष्माणः | |
| कण्ठः – (अकुहविसर्जनीयानां कण्ठः।) | अ आ | क् ख् ग् घ् ङ् | | ह् | कण्ठ्यः। |
| तालुः – (इचुयशानां तालुः) | इ ई | च् छ् ज् झ् ञ् | य् | श् | तालव्यः। |
| मूर्धा – (ऋटुरषाणां मूर्धा।) | ऋ | ट् ठ् ड् ढ् ण् | र् | ष् | मूर्धन्यः। |
| दन्ताः – (लृतुलसानां दन्ताः) | लृ | त् थ् द् ध् न् | ल् | स् | दन्त्यः। |
| ओष्ठाः – (उपूपध्मानीयानाम् ओष्ठौ) | उ ऊ | प् फ् ब् भ् म् | | | ओष्ठ्यः। |
| कण्ठोष्ठौ (ओकारस्य कण्ठोष्ठौ) | ओ औ | | | | कण्ठोष्ठ्यः। |
| कण्ठतालु (एकारस्य कण्ठतालु) | ए ऐ | | | | कण्ठतालव्यः। |
| दन्तोष्ठः (वकारस्य दन्तोष्ठः) | | | व् | | दन्तोष्ठ्यः |